छमः, छमः, चिच्छमिषः, चञ्छमः ;
छमितुम् , छमयितुम् , चिच्छमिषितुम् , चञ्छमितुम् ;
[1]छान्तिः, छमना, चिच्छमिषा, चञ्छमा ;
छमनम् , छमनम् , चिच्छमिषणम् , चञ्छमनम् ;
[2]छमित्वा-छान्त्वा, छमयित्वा, चिच्छमिषित्वा, चञ्छमित्वा ;
प्रच्छम्य, [3]प्रच्छमय्य, प्रचिच्छमिष्य, प्रचञ्छम्य ;
छमम् २, छमित्वा २, छान्त्वा २, } [4]छमम् २, छामम् २, छमयित्वा २, } चिच्छमिषम् २, चिच्छमिषित्वा २, } चञ्छमम् २ ; चञ्छमित्वा २. }

## (565) "छर्द वमने" (X-चुरादिः-1589. अक. सेट्. उभ.)

छर्दकः-र्दिका, चिच्छर्दयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककर्णयतिवत् (170) ज्ञेयानि । [5]प्रच्छर्दिका । [A]प्रच्छर्दितः ।

## (566) "छष हिंसायाम्" (I-भ्वादिः-890. सक. सेट् उभ.)

छाषकः-षिका, छाषकः-षिका, चिच्छषिषकः-षिका, चाच्छषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकभक्षणार्थकचषतिवत् (514) ज्ञेयानि । [B]छषितः ।

---

1. 'तितुत्र—' (7-2-9) इतीण्णिषेधः । दीर्घे, अनुस्वारे, परसवर्णे च रूपम् ।
2. 'उदितो वा' (7-2-56) इति क्त्वायामिड्विकल्पः । तेन रूपद्वयम् ।
3. 'ल्यपि लघुपूर्वात्' (6-4-56) इति णेरयादेशः ।
4. 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (6-4-93) इति णमुल्परे णौ दीर्घविकल्पः ।
5. 'रोगाख्यायां ण्वुल् बहुलम्' (3-3-108) इति स्त्रियां भावादौ ण्वुल् । 'प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः' (7-3-44) इति इत्त्वम् । **प्रच्छर्दिका**= वमथुः । '**प्रच्छर्दिका** वमिश्च स्त्री पुमांस्तु वमथुः समाः ।' **इत्यमरः** ।

A. 'बर्हादिमण्डितसुभण्डितविग्रहोऽसौ
**प्रच्छर्दितः** किल बकेन च पुस्तितार्तिः ।' **धा. का.** 3-20.

B. 'लाषेण चाषांश्छषिताञ्झषित्वा प्रभ्लक्ष्य भक्षन्ति यदम्बु नीचाः ।'
**धा. का.** 2-28.